# श्रीमदुदयनदृशा ईश्वरनिरूपणम्

**बाबुराम आचार्यः**

*उपप्राध्यापकः, विश्वविद्यालयविद्यापीठम्, दाङ्गः*

baburamacharya87@gmail.com

**सारसंक्षेपः**

*प्रस्तुतोऽयं लेखो न्यायवैशेषिकविभूतिभूतस्य श्रीमदुदयनाचार्यस्य जीवनवृत्ते अपि च परमदार्शनिकेन तेनोदयनाचार्येणाष्टविधहेतुभिः प्रमाणीकृतस्येश्वरस्य विषये केन्द्रितो वर्तते। तात्त्विकदृष्ट्या न्यायवैशेषिकोभयदर्शनयोः प्राचीनार्वाचीनयुगाभिसन्धौ दर्शनजीवनस्याधार इवायं श्रीमदुदयनः, अत एवास्य वैशिष्ट्यमत्रालेखे संक्षेपतः प्रस्तूयते। एवमेव बौद्धचार्वाकप्रभृतिनास्तिकदार्शनिकैर्विस्तारितशास्त्रीयतमोनाशाय प्रवृत्तोऽयमाचार्यो विविधतर्कैर्न्याय-कुसुमाञ्जलिग्रन्थे नास्तिकैराक्षिप्तानां पञ्चतयीविप्रतिपत्तेः खण्डनं मण्डनञ्च करोतीश्वरसत्तायै। आचार्येण न्यायदर्शनाभिमतचतुर्षु प्रमाणेषु कुत्रचित् प्रत्यक्षेण बहुषु स्थलेष्वनुमानेन क्वचिदुपमानेन क्वचिच्च शब्दप्रमाणद्वारा परमात्मनोऽस्तित्वं नितरां साधयति। अपि च विविधदृष्टान्तबलादष्टाभिर्हेतुभिः सामान्यजनान् सरलतयावबोद्धुं प्रयतते। अस्मिन्नालेखे अन्येषु दर्शनेष्वीश्वरस्य सत्ताऽसत्त्वविषये किं किमुक्तमस्तीत्यपि विषयोऽतिसंक्षेपेण लेखेऽस्मिन् प्रस्तुतोऽस्ति। अनेनाऽनुसन्धानमूलकनिष्कर्षेण दर्शनशास्त्राध्येतृजनानामीश्वरविषये उदयनाचार्यस्य मतं किम् ? तत्रोदयनाचार्यस्य का दृष्टिः ? इत्यादिविषयबोधार्थं सारल्यं भविष्यतीत्यपेक्षते।)*

**शब्दकुञ्जी**

कार्यम्, आयोजनम्, प्रत्ययः, संख्याविशेषः, अव्ययः।

**विषयपरिचयः**

सामान्यतः पौरस्त्यदर्शनं तत्रापि विशेषत आस्तिकदर्शनमध्यात्मविद्याया मूलम्। दर्शनशब्दस्तु ज्ञानार्थक–*दृशिर् प्रेक्षणे* इत्येतस्माद्धातोर्भावे करणे वाऽर्थे ल्युट्प्रत्यये, अनादेशे, गुणे च कृते निष्पद्यते। दर्शनं प्राच्य–पाश्चात्त्यभेदेन द्विधा विभज्यते तत्रापि प्राच्यदर्शनं वैदिकावैदिकभेदेन द्विविधं भवति। तत्र जैन–चार्वाक–बौद्धदर्शनमवैदिकञ्चेन्न्याय–वैशेषिक–साङ्ख्य–योग–मीमांसा–वेदान्तदर्शनं वैदिकम्। प्राच्यदर्शनानां नास्तिकाऽऽस्तिकभेदेन द्विधा विभागोऽपि क्रियते दार्शनिकैः। तत्र नास्तिको वेदनिन्दकः इत्युक्तप्रकारेण वेदधारायामप्रवहन्ति चार्वाकजैनबौद्धानि नास्तिकदर्शनानि चेन्न्यायवैशेषिकसाङ्ख्ययोगमीमांसावेदान्ताख्यानि वैदिकधारायां प्रवहन्ति तान्यास्तिकदर्शनान्युच्यन्ते। चार्वाकादीनि दर्शनानि वैदिकवाक्यानि प्रमाणतया न स्वीकुर्वन्ति, अपितु तर्कमात्रेण वस्तुस्वरूपं निर्धारयन्ति चेन्न्यायवैशेषिकादीनि

दर्शनानि वेदाख्यं शास्त्रं स्पष्टतया प्रमाणत्वेनाङ्गीकुर्वन्ति। पाणिनिमते *अस्ति परलोक इत्येवं मतिर्यस्य स आस्तिकः, नास्ति परलोक इत्येवं मतिर्यस्य स नास्तिकः* इति व्युत्पत्तिपक्षे *अस्तिनास्तिदिष्टं मतिः(पा.सू.४।४।६०)* इति सूत्रद्वारा निर्मिताविमावास्तिकनास्तिकशब्दौ। एवमर्थे कृते सति परलोकस्यास्तित्वं स्वीकुर्वत्सु न्यायवैशेषिकादिवैदिकदर्शनेषु यथाऽयमास्तिकशब्दस्य प्रयोगोऽर्हस्तथैव परलोकानङ्गीकाराच्चार्वाकदर्शनमतिरिच्य नास्तिकत्वेन परिगणितयोर्जैनबौद्धयोरपि। तस्माद्धेतोर्दर्शनानां वैदिकावैदिकदर्शनविभागोऽर्हो न त्वास्तिकनास्तिकविभागः। न्यायकुसुमाञ्जलिराचार्यस्योदयनस्य महत्त्वपूर्णो मौलिको ग्रन्थोऽस्ति। न्यायकुसुमाञ्जलिग्रन्थे पूर्वपक्षिभिः पञ्चतयी विप्रतिपत्तिः प्रस्तुता वर्तते। तद्यथा – *अलौकिकस्य परलोकसाधनस्याभावात्, अन्यथापि परलोकसाधनानुष्ठानसम्भवात्, तदभावावेदकप्रमाणाभावात्, सत्त्वेऽपि तस्याप्रमाणत्वात्, तत्साधकप्रमाणाभावाच्चेति(न्या.कु.२०१९:२५)*। तस्याः पञ्चतयीविप्रतिपत्तेः संक्षेपतो विवेचनमत्रालेखे क्रियते। श्रीमदुदयनेनेश्वरविषयकचिन्तने सन्ति नैकाः समस्याः। नास्तिकैरीश्वरसत्त्वस्याङ्गीकारविषयकचिन्तनस्य निराकरणायैवायं लेखः प्रस्तूयते। तत्र कया पद्धत्येश्वरः साध्यते ? ईश्वरः समवायि–असमावायि–निमितत्तकारणेषु किम् ? श्रुतयः परमात्मानं कथं प्रतिपादन्ति ? इत्यादिसमस्यानां समाधानान्वेषणे प्रयासो विहितो वर्तते।

## अध्ययनविधिः

इदं हि गुणात्मकप्रकारकमध्ययनम्। अत्र न्यायवैशेषिकदर्शनसम्बद्धग्रन्थानामध्ययनेन प्राप्तानां तथ्यानां तुलनात्मकं विश्लेषणं कृत्वा निष्कर्षः स्थापितो वर्तते।

## अनुसन्धानस्य क्षेत्रं सीमाङ्कनञ्च

न्यायदर्शनगतन्यायकुसुमाञ्जलिग्रन्थ एवास्यानुसन्धानस्य विषयक्षेत्रमस्ति। एकस्मिन् खलु लघ्वात्मकलेखे समग्रग्रन्थयोर्विश्लेषणं तोलनञ्चासम्भवमिति निश्चित्य केवलं पञ्चविप्रतिपत्तीर्विवेच्येश्वरसिद्धये समीक्षाऽत्र विहिता। अपिच न्यायकुसुमाञ्जलिग्रन्थस्य पञ्चमस्तबके विद्यमानस्य कार्यायोजनधृत्यादेरितिश्लोकस्य समीक्षा विहितेति अस्य लेखस्य सीमा विद्यते।

## तथ्याङ्कसङ्कलनं तत्साधनानि च

अत्राध्ययने न्यायकुसुमाञ्जलिग्रन्थतः कुत्रचिद् वैशेषिकदर्शनसम्बद्धग्रन्थेभ्यस्तथ्याङ्कसङ्कलनं कृतमिति प्राथमिकस्रोतस एव तथ्याङ्कसङ्कलनसाधनानि सन्ति।

## तथ्याङ्कविश्लेषणप्रक्रिया

अत्रानुसन्धानक्रमे सर्वप्रथमं न्यायकुसुमाञ्जलिग्रन्थस्य चयनं विधीयते। प्रसङ्गे च न्यायकुसुमाञ्जलिग्रन्थस्थसमस्तविषयाणां चर्चा जटिलेति मत्वा संक्षेपेण पञ्चतयीविप्रपत्तेः चर्चा विधीयते।

उक्तप्रसङ्गे ह्यागतानां दर्शनसम्बद्धविषयाणामपि चर्चाऽनिवार्यत्वेनोपस्थाप्यते। एषैवास्याऽऽलेखस्य विश्लेषणप्रक्रिया वर्तते।

## सैद्धान्तिकपर्याधारः

अस्यानुसन्धानस्य विश्लेषणक्रमे लेखस्वरूपनिर्माणक्रमे च सङ्कलिततथ्यानां सन्दर्भस्रोतःप्रदर्शनाय गद्यात्मकाधुनिकग्रन्थानां कृते विश्वप्रचलिताया लेखक–मिति–पद्धतेः(एपीए–पद्धतेः) सूत्रसन्दर्भप्रदर्शनाय संस्कृतवाङ्मयान्तर्गते न्यायवैशेषिकदर्शनयोः स्तबक–अध्यायपादसूत्रसंख्यापद्धतेः प्रयोगः कृतो वर्तते। तथैव मौलिकपद्धतिरूपेण बहुप्रचलिताया अध्याय–आह्निक–सूत्रसंख्यापद्धतेश्च प्रयोगो विधीयते।

## आचार्यः श्रीमदुदयनः

भारतदेशस्य सुप्रसिद्धो विद्वान् आचार्यः श्रीमदुदयनो न्यायवैशेषिकविभूतिभूतः सन् परमज्ञानवानास्तिकश्चासीत्। तमुदयनं *क्वचिद् उदयनः, क्वचिद् उदयाकरः, क्वचिद् न्यायाचार्योदयनः, क्वचिच्च उदयशंकर इत्येवंविधनामभिः प्रोच्चार्यते स्म(शशिबालागौडः, २०१७ ई.: १५)* अतस्तदानीन्तदार्शनिकास्तद्देशवासिनश्च पूर्वोक्तनामभिर्व्यवहरन्ति स्म। अस्याचार्यस्य जन्म दशमशताब्द्याः उत्तरार्धे ९८४तमे ईसवीये मिथिलायां कमलानद्याः पूर्वतटे मणरोणीनामके ग्रामे ब्राह्मणकुले अभवत्। आचार्येण लक्षणावलीग्रन्थे –

*तर्काम्बराङ्कप्रमितेष्वतीतेषु शकान्ततः।*
*वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलीम्॥ (न्या.कु.भूमिका,२०१९:पृ.१)*

इत्युक्त्वा स्वसमयं स्पष्टीकृतम्। एनमुदयनं *भगवदवताररूपेण जगतितले अवतीर्णः सः* इति भक्तिमाहात्म्यमित्याख्ये ग्रन्थे स्पष्टयोल्लेखो वर्तते। यथा –

*भगवानपि तत्रैव मिथिलायां जनार्दनः।*
*श्रीमदुदयनाचार्यरूपेणावततार ह॥ (न्या.कु.भूमिका,२०१९:पृ.१)*

अयं न्यायवैशेषिकोभयदर्शनयोरत्युत्कृष्टप्रतिभावानासीत्। भविष्यपुराणान्तर्गतभगवद्भक्तमाहात्म्यस्य त्रिंशदध्याये अस्य विषये उल्लेखः प्राप्यते। यथा –

*अथ वक्ष्ये तृतीयस्य हरेरंशस्य धीमतः।*
*उदयनाचार्यनाम्नस्तु माहात्म्यं रोमहर्षणम्॥*
*भूत्वा स मिथिलाख्ये तु शास्त्राण्यध्यैष्ट सर्वशः।*
*विशेषतो न्यायशास्त्रे साक्षाद् वै गौतमो मुनिः॥ (न्या.कु.भूमिका,२०१९:पृ.४)*

असौ उदयनाचार्यो वेदविरुद्धतया सर्वेषां वैदिकमार्गाणां खण्डनं विधाय जगति ज्ञानमाच्छाद्य नास्तिकप्रवृत्तौ जनान् नेतुमद्युक्तान् सर्वान् बौद्धधर्मावलम्बिनः प्रबलतर्कैः खण्डयामास। अनेन तात्कालिकावस्थायां बौद्धसिद्धान्तेनाक्रान्तविदुषां सौलभ्याय प्रशस्तपादभाष्योपरि आनन्ददायिनी किरणावली, आत्मतत्त्वविवेकः,

न्यायकुसुमाञ्जलिः, लक्षणावली, महर्षिगौतमप्रणीतन्यायसूत्रवार्तिकतात्पर्यटीकोपरि परिशुद्धिनाम्नी टीका, न्यायपरिशिष्ट इत्यादयोऽनेके ग्रन्था विरचिताः। बौद्धाचार्यस्य कल्याणरक्षितस्येश्वरभङ्गकारिकानाम्नो ग्रन्थस्य खण्डनमेव ग्रन्थस्यास्य विशिष्टा प्रवृत्तिरस्ति। कल्याणरक्षितेनेश्वरभङ्गकारिकायामीश्वरवादस्य खण्डनं विहितमस्ति, तस्य मतस्य खण्डनमण्डनार्थं आचार्योदयनेन न्यायकुसुमाञ्जलिनाम्नो महत्त्वपूर्णग्रन्थस्य रचना विहिता। अयं भक्तशिरोमणिरप्यासीदिति त्वस्य जीवनवृत्तालोडनेन ज्ञायते। वेदान्निरस्येश्वरस्यानस्तित्वं स्वीकुर्वतां बौद्धप्रभृतीनां पुरतोऽनुमानेन शब्दप्रमाणेन च परमात्मा प्रतिपादितोऽनेन न्यायकुसुमाञ्जलिग्रन्थे। ग्रन्थादौ उदयनाचार्यो वक्ति –

*स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः ।*
*यदुपास्तिमसावत्र परमात्मा निरूप्यते ॥(न्या.कु.,१।२ ॥*

## आचार्योदयनदृशेश्वरनिरूपणम्

न्यायकुसुमाञ्जलिग्रन्थे ईश्वरसत्तामस्वीकुर्वद्भिरनीश्वरवादिभिः प्रस्तुताः पञ्चविप्रतिपत्तयो वर्तन्ते। तासां सप्रमाणं खण्डनपुरस्सरं स्वमतं स्थापयत्युदयनाचार्यः। तत्रादौ ईश्वरतत्त्वं सर्वैरपि स्वीक्रियत इति निष्कर्षं स्थापयञ्चतुर्विधपुरुषार्थविषये कुसुमाञ्जलिग्रन्थे ग्रन्थकारो वक्ति यथा – *इह यद्यपि यं कमपि पुरुषार्थमर्थमानाः शुद्धबुद्धस्वभाव इत्यौपनिषदाः, आदिविद्वान् सिद्ध इति कापिलाः, क्लेशकर्मविपाकैरपरामृष्टो निर्माणकायमधिष्ठाय सम्प्रदायप्रद्योतकोऽनुग्राहकश्चेति पातञ्जलाः, लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति महापाशुपताः, शिव इति शैवाः, पुरुषोत्तम इति वैष्णवाः, पितामह इति पौराणिकाः, यज्ञपुरुष इति याज्ञिकाः, सर्वज्ञ इति सौगताः, निरावरण इति दिगम्बराः, उपास्यत्वेन देशित इति मीमांसकाः, लोकव्यवहारसिद्ध इति चार्वाकाः, यावदुक्तोपपन्न इति नैयायिकाः, किं बहुना यं कारवोऽपि विश्वकर्मेत्युपासते, तस्मिन्नेवं जातिगोत्रप्रवरचरणकुलधर्मादिवदासंसारं सुप्रसिद्धानुभावे भगवति भवे सन्देह एव कुतः ?* (न्या.कु.वि.सं.२०१९:१५) इत्युक्त्वा परमात्मनि सन्देहो व्यर्थ इति भावं प्रस्तौति। अस्य मतौ सर्वतोभावेनेश्वरस्य सत्ता सर्वैरपि स्वीकृताऽस्ति। तथाप्ययं भक्तशिरोमणिरीश्वरसत्तां प्रमाणीकर्तुं नास्तिकमतखण्डनपुरस्सरं स्वमतस्थापनाय च जगति भगवदवताररूपेणागत इति प्रायः सर्वे दार्शनिका उद्घोषयन्ति। अग्रे आचार्योदयनस्येश्वरनिरूपणप्रणाली कथमस्तीति विषये चर्च्यते। तत्पूर्वमन्येषु नास्तिकास्तिकदर्शनेष्वीश्वरस्यानस्तित्वमस्तित्वं वेति विषयाः प्रस्तूयन्ते। नास्तिकदर्शनेषु साङ्ख्यमीमांसादर्शनयोश्चेश्वरस्यास्तित्वमेव स्वीकृतन्नास्ति। तत्र चार्वाकमते जडतत्त्वानां सम्मिश्रणेनैव संसारोत्पत्तिर्जायते। अतः संसारोत्पत्तौ नान्यः कश्चित् स्रष्टा अपेक्ष्यते। ईश्वरास्तित्वविषये आस्तिकदार्शनिकाः यान् यान् तर्कान् स्वसिद्धान्तबलाद् प्रस्तुवन्ति, तेषां युक्त्याऽयुक्त्या वा खण्डनार्थमेव प्रवर्तन्ते परमनास्तिका वितण्डाश्चार्वाकाः। एतेषां कार्यं ध्वंसात्मकं दृश्यते न तु रचनात्मकम्। एवमेव चार्वाकदर्शनं सृष्टिवादं नाङ्गीकरोति परन्तु विकासवादो विश्वसिति। विकासवादानुसारं सृष्टिः क्रमेणैव जायते न तु कस्मिँश्चिदेककाले। पृथिवीजलतेजोवायूनां चतुर्णां महाभूतानां तादृशः स्वभावो वर्तते यत्तेषां सम्मिश्रणेनैव चेतनाऽचेतनाः पदार्था जायन्ते। सृष्टौ यादृश्यो नियमव्यवस्था

दृश्यन्ते ताः सर्वा अपि प्रकृतेः स्वाभाविकगुणेनैव दृश्यन्ते। एतादृशसिद्धान्तप्रतिपादनेन दर्शनमिदं चार्वाकमीश्वरस्यात्तित्वं प्रतिपादयति। चार्वाकदर्शने प्रसिद्धोऽयं सिद्धान्तः –

*यावज्जीवेत् सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत्।*
*भस्मीभूतस्य देहस्य पुनरागमनं कुतः ? ॥ (माधवाचार्यः, २०१०: २१)*

दर्शनमिदं व्यावहारिकसत्तावेमाङ्गीकरोति। यथा कथञ्चिदपि सुखं सम्पाद्यतामिति धिया दैहिकं सुखमेव स्पष्टतया प्रतिपाद्य पिबत, खादत, रमध्वञ्चेत्येतादृशसिद्धान्तमङ्गीकरोति। दैहिकं सुखमेव स्पष्टतया प्रतिपाद्य पिबत, खादत, रमध्वञ्चेत्येतादृशसिद्धान्तं प्रतिपादयति। अयमेवास्य मूलसिद्धान्तः। एनमेव सिद्धान्तं न्यायकुसुमाञ्जलिग्रन्थस्य प्रथमस्तबके चार्वाकदर्शनस्य, द्वितीये स्तवके मीमांसकदर्शनस्य, तृतीये स्तवके बौद्धदर्शनस्य, चतुर्थे स्तबके जैनदर्शनस्य पञ्चमे स्तबके सांख्यदर्शनस्य चेश्वरविरोधिमतखण्डनं कृत्वा तर्कबलात् चतुर्विधप्रमाणैरीश्वरसिद्धिं करोति ग्रन्थकारः। तत्र पूर्वपक्षिणां पञ्च विप्रतिपत्तीः उपस्थाप्य प्रत्येकं स्तबके प्रत्येकं विप्रतिपत्तेः खण्डनं मण्डनञ्च विधाय पञ्चमस्तबके ईश्वरसाधनाय विविधप्रमाणानि प्रस्तौति। ताश्च पञ्च विप्रतिपत्तयोऽधोलिखिताः सन्ति –

१. अलौकिकस्य परलोकसाधनस्याभावात् (चार्वाकमतम्), २. अन्यथापि परलोकसाधनानुष्ठानसम्भवात् (मीमांसकमतम्), ३. तदभावावेदकप्रमाणसद्भावात् (बौद्धमतम्), ४. सत्त्वेऽपि तस्याप्रमाणत्वात् (जैनमतम्) ५. तत्साधकप्रमाणाभावात् (साङ्ख्यदर्शनम्)। एतासु विप्रतिपत्तिषु आद्यं यथा – अलौकिकस्य परलोकसाधनस्याभावात् इत्यत्र त्रीणि कारणानि पूर्वपक्षिणा चार्वाकेण स्थापितानि। तत्र अस्या विप्रतिपत्तेस्तात्पर्यम् – चार्वाकमतेः प्रत्यक्षप्रमाणद्वारा यज्ज्ञानं भवति, तस्यैव जगति अस्तित्वं वर्तते, प्रत्यक्षेण यद्वस्तु ज्ञातुं न शक्यते, न तस्यास्तित्वम्। तस्माद्धेतोस्तस्य परलोकस्य साधनभूतयोर्धर्माधर्मयोर्दृष्टादृष्टयोर्वाऽप्रत्यक्षीभूतपदार्थयोरस्तित्वं नैवामनन्ति चार्वाकाः। अतोऽलौकिकस्य धर्माधर्मादेरभावात् परलोकस्याप्यभावः स्वत एव सिद्धः। परलोकस्याभावाच्च नैयायिकैस्तदधिष्ठातृत्वेन स्वीकृतस्येश्वरस्य परमात्मनः सिद्धिः कदापि न भवति। पुनश्च – चार्वाकः कार्यकारणभावं न मनुते। तस्य मते जगदिदं स्वत एवोत्पन्नम्। तस्य कृते नान्यः कश्चनापेक्ष्यते। यथा –

*अत्र चत्वारि भूतानि भूमिवार्यनिलानलाः।*
*चतुर्भ्यः खलु भूतेभ्यश्चैतन्यमुपजायते॥*
*किण्वादिभ्यः समेतेभ्यो द्रव्येभ्यो मदशक्तिवत्।*
*अहं स्थूलः कृशोऽस्मीति सामानाधिकरण्यतः ॥(माधवाचार्यः, २०१०:९)*

अतो जगतो निर्माणे परलोकस्य व्यवस्थायां धर्माधर्मफलविषये च तस्याधिष्ठातुरीश्वरस्यावश्यकता एव नास्ति इति भावोऽस्या विप्रतिपत्तेः। अस्याः समाधानमुदयनाचार्येणेत्थं क्रियते –

*सापेक्षत्वादनादित्वात् वैचित्र्याद् विश्ववृत्तितः।*
*प्रत्यात्मनियमाद् भुक्तेरस्ति हेतुरलौकिकः ॥(न्या.कु.१।४॥*

अत्र प्रथमतः सापेक्षत्वादित्यादिना समाधानं विधीयते। अत्रानुमानवाक्यं यथा – 'कार्यं सहेतुकं कादाचित्कत्वात् भोजनजन्यतृप्तिवत्' अर्थात् कार्यं किल सहेतुकं भवति। कादाचित्कत्वं नाम सदाऽविद्यमानत्वम्। कादाचित्कत्वहेतोः साध्यं सहेतुकत्वम्। उभयोर्व्याप्तिर्भवति यत्र यत्र कादाचित्कत्वं तत्र तत्र सहेतुकत्वमिति। भोजनजन्यतृप्तिवदित्युदाहरणम्। यथा भोजनजन्यतृप्तिः सदा न भवति अर्थाद् भोजने कृते सति सद्यस्तृप्तिर्भवति। अतो भोजनजन्यतृप्तिः कादाचित्कत्वं सहेतुकत्वञ्च वर्तते। तथैव कार्यमपि कादाचित्कत्वमेव खलु। कादाचित्कत्वात् सहेतुकमपि सिद्धम्। अनेन लोकव्यवहारेण कार्यकारणभावसिद्धिर्भवति। अनेन कार्यकारणभावसहयोगेनेश्वरसिद्धिर्भवतीत्याशयः।

पुनश्चार्वाक आक्षिपति – पूर्वोक्तकार्यकारणभावो नैवोपयुक्तः। यतोहि घटपटादीनां यत्कारणानि भवन्ति, तानि नित्यानि उतानित्यानि ? कारणानि नित्यानि चेद् घटपटादयोऽपि नित्या वाच्या। यद्यनित्यानि कारणानि चेत् तेषां कारणानामपि कारणानि वक्तव्यानि। पुनरपराणामपि कारणानां कारणानि वक्तव्यानीति रीत्या महाननवस्थादोष उत्पद्यते। अतः कार्यकारणसिद्धान्तो दोषयुक्त इति पूर्वपक्षस्याशयस्य खण्डनाय श्रीमदुदयनोऽपरं हेतुं प्रस्तौति अनादित्वादिति। वस्तुतोऽयं कार्यकारणभावसिद्धान्तो बीजाङ्कुरवत् प्रामाणिकी वर्तते। अर्थाद् बीजादङ्कुरमुत्पन्नं वा अङ्कुराद्बीजम् ? बीजाभावे अङ्कुराभावो वाऽङ्कुराभावे बीजाभावः ?। अत उभयोः सिद्धान्तयोरनवस्थादोषो विद्यत एवेति चेन्न – बीजाङ्कुरवत् कार्यकारणभावपरम्परा प्रामाणिकी न तु अप्रामाणिकी। अतो नैवानवस्थादोषप्रसङ्गः।

पुनश्च चार्वाकः कथयति – साङ्ख्याभिमता नानाबुद्ध्यात्मिका प्रकृतिरेव कारणमस्तु अथवा वेदान्ताभिमतं ब्रह्म कारणं भवतु, किमर्थं धर्माधर्मयोः कल्पना करणीयेति पूर्वपक्षस्य समाधानार्थं वैचित्र्यादिति तृतीयो हेतुः प्रदर्श्यते। कार्यं विचित्रकारणवद् विचित्रकार्यत्वादित्यनुमानेनादृष्टं कारणं स्वीकार्यमेव। भोगादिकार्याणां विचित्रत्वात् कारणान्यपि विचित्राण्येव भवितव्यानि न तु साङ्ख्याभिमता प्रकृतिर्वेदान्ताभिमतं ब्रह्म वा कारणं भवितुमर्हति। अतोऽदृष्टं कारणं, तदधिष्ठातृत्वेनेश्वरसिद्धिर्भवतीति ग्रन्थकारस्याशयः।

तत्र चार्वाकः पुनराक्षिपति – दृष्टं यागादिकमेव कारणं हेतुर्वास्तु, अदृष्टस्य कल्पनैव व्यर्थेति शंकासमाधानाय विश्ववृत्तित इति तुरीयो हेतुः प्रदर्शितः। समस्तपरलोकार्थिनां यागादौ प्रवृत्तिर्दृश्यते। यागादिकर्मणः क्षणिकत्वाद् चिरध्वस्तस्य तस्यादृष्टमन्तरा कालान्तरे स्वर्गादिफलप्रदातुं नैव समर्थत्वमतोऽदृष्टमवश्यमङ्गीकर्तव्यम्। तस्यादृष्टाधिष्ठातृतयेश्वरसिद्धिर्भवतीत्याचार्यमतम्।

पुनरपि पूर्वपक्षी शंकते – अयि भोः ! अदृष्टमेव कारणं भवतु, परं तददृष्टन्तु भोग्यवस्तुनिष्ठमेव तत्वीश्वनिष्ठमिति चेन्न, प्रत्यात्मनियमाद्भुक्तेरिति। यद्यदृष्टं भोग्यनिष्ठन्तर्हि वस्त्वेकं केवलमेकस्य प्राणिनः कृते सुखकारकमपरस्य च कृते दुःखकारकं न भवेत्, परन्तु लोकव्यवहारे तथा न दृश्यते। उष्ट्राय कण्टकोऽत्यन्तं रुचिकरश्छेदजायै अत्यन्तं कष्टकरो भवति किल। अतः सर्वप्राणिनां भोगो भिन्न भिन्न एव। आत्मनि त्वदृष्टे स्वीक्रियमाणे सत्यदृष्टभेदान्नानाविधभोग उपपद्यते। तस्मादात्मनिष्ठमेवादृष्टमङ्गीकर्तव्यम्। तददृष्टाधिष्ठातृत्वेनेश्वरसिद्धिर्भवतीति ग्रन्थकारस्याभिप्रायः।

द्वितीये स्तबके अन्यथापि *परलोकसाधनानुष्ठानसम्भवात्* इति द्वितीया विप्रतिपत्तिर्मीमांसकानां वर्तते। ते च मीमांसका वेदस्यापौरुषेयत्वं स्वीकुर्वन्तो वेदमार्गानुयायिनः कर्मकाण्डपराश्च सन्त ईश्वरममन्यमाना ईश्वराभावेऽपि परलोकसाधनयज्ञानुष्ठानं सर्वथा सम्भवं भवतीत्याक्षिप्येश्वरखण्डनायेमां द्वितीयाविप्रतिपत्तिं प्रस्तुवन्ति। अन्यथापि = ईश्वरं विनापि, परलोकसाधनस्य = यागादेरनुष्ठानस्य, सम्भवात्। तात्पर्यमिदम् – यागाद्यनुष्ठानाय हीष्टसाधनताज्ञानमपेक्षितम्, तच्च ज्ञानं वेदादेव सम्भवति। वेदस्य प्रामाण्यन्तु नित्यत्वात् दोषरहितत्वान्महाजनपरिग्रहेण च सिद्धम्। सति च वेदप्रामाण्ये ईश्वरस्य काऽऽवश्यकता ? इति पूवपक्षिभिरुक्ते तत्र ग्रन्थकार उदयनः समाधत्ते –

*प्रमायाः परतन्त्रत्वात् सर्गप्रलयसम्भवात्।*
*तदन्यस्मिन्नविश्वासान्न विधान्तरसम्भवः ॥(न्या.कु.२।१)*

अर्थाद् वेदानुयायिनो मीमांसका वेदस्य प्रमाणत्वादपौरुषेयवेदविहितमार्गादेव यज्ञयागादिकर्माणि कुर्वन्ति। अत्र मीमांसकाभिमतापौरुषेयो वेद इत्युक्ते शाब्दी प्रमा, सा च प्रमा केनचन वक्तृयथार्थवाक्यार्थधीरूपगुणजन्या भवति। अतः शाब्दीप्रमायाः परतन्त्रत्वात् शब्दप्रयोगो यथार्थवक्त्रैव सम्भवः। अपि च महाजनपरिग्रहेण वेदो नित्यमित्युच्यते चेत् प्रलयावस्थायां वेदस्य नाशे, सृष्ट्यादौ महाजनपरिग्रहशून्ये च वेदस्य नित्यत्वमित्ययथार्थस्तु स्पष्टमेव। अतो वेदकर्तृत्वेनेश्वर एव कारणम्। एवमेव कपिलर्षिप्रभृतिभिर्वेदो रचितो न त्वीश्वरेणेति पूर्वपक्षे उपस्थापिते ग्रन्थकारो वक्ति – तदन्यस्मिन्नविश्वासादिति। कपिलर्षिप्रभृतयो यदि सर्वज्ञास्तर्हि ईश्वरेतरेष्वविश्वासात्। कपिलप्रभृतयो वेदकर्तार इत्युच्यमाने सति तु बहवो वेदकर्तारो भवन्ति, तन्न लाघवमपि तु गौरवमेव। गौरवाच्चैकाक्येव वेदकर्ता भवत्विति विचिन्त्येश्वर एवेत्युक्तं न विधान्तरसम्भव इति वाक्येन।

तृतीयस्तबके *'तदभावावेदकप्रमाणसद्भावात्'* इति बौद्धानां तृतीया विप्रतिपत्तिरस्ति। ईश्वरस्याभावसाधनाय प्रमाणस्य सत्ता विद्यतेऽत ईश्वरो नास्तीत्ययं भावो विप्रतिपत्तेः। यथा भूतले घटानुपलब्ध्या घटाभावो वर्तत इति स्पष्टं भवति, तद्वदेवेश्वरस्यानुपलब्ध्या तस्येश्वरस्याभाव इति ज्ञातव्यमिति पूर्वपक्षिबौद्धानामाक्षेपः। आचार्यः समाधत्ते यथा –

*योग्यादृष्टिः कुतोऽयोग्ये प्रतिबन्धिः कुतस्तराम्।*
*क्वायोग्यं बाध्यते शृङ्गं क्वानुमानमनाश्रयम् ॥(न्या.कु.३।१)*

अनुपलब्धिरभावसाधिका न भवति किन्तु योग्यानुपलब्धिः। केवलमनुपलब्धेरभावसाधकत्वे आकाशधर्माधर्मादिकस्य अतीन्द्रियमात्रस्य विलोपः स्यात्। ईश्वरस्य प्रत्यक्षायोग्यत्वादनुपलब्ध्या ईश्वराभावो नैव सिद्ध्यति। अत्र बौद्धः शंकते – अनुपलब्धिरभावसाधिका न भवति चेद् शशशृङ्गस्यापि अप्रत्यक्षात्वादनुपलब्ध्या च तदभावो न भवतीति वक्तव्यं किल। समाधानम् – वस्तुतः शृङ्गं प्रत्यक्षयोग्यं तथापि शशे शृङ्गस्य सम्बन्धो नास्ति। अतः प्रत्यक्षयोग्यस्य शृङ्गस्य शशे अनुपलब्ध्या शशशृङ्गाभावः सिद्धः। योग्यवस्तुनोऽनुपलब्ध्या अभावस्य स्वीकृतत्वात् बौद्धैः प्रस्तुतस्येश्वराभावो नैव सिद्ध इति तृतीयस्तबके प्रतिपादितमाचार्येण।

*सत्त्वेऽपि तस्याप्रमाणत्वात्* इति चतुर्थो विप्रतिपत्तिर्जैनानाम्। ईश्वरस्य सत्त्वेऽपि तस्येश्वरस्य प्रमाणाभावादिति शब्दार्थः। अत्र जैनानां पूर्वपक्षः – अगृहीतग्राहि ज्ञानं प्रमा अर्थात् यस्यानधिगतार्थस्याज्ञातस्य वा वस्तुनो ज्ञानं भवति तत्प्रमेत्युच्यते। सर्वज्ञे ईश्वरे अगृहीतग्राहित्वस्याभावादीश्वरज्ञानं न प्रमा। अत ईश्वरः प्रमायाः कारणाभावान्नास्तीश्वरः। पुनश्चाप्रमाणपुरुषे तस्य वचने च कः श्रद्धां कुर्यादिति जैनानां सिद्धान्तः। ग्रन्थकर्त्रा समाधानं क्रियते –

*अप्राप्तेरधिकप्राप्तेरलक्षणमपूर्वदृक्।*
*यथार्थानुभवो मानमनपेक्षतयेष्यते ॥(न्या.कु.४.१)*

जैनैः स्वीकृतस्य अगृहीतग्राहि प्रमेति प्रमालक्षणं नैयायिका नाङ्गीकुर्वन्ति। अयं घटः, अयं घटः इति धारावाहिकज्ञाने प्रथमक्षणं विहाय द्वितीयादिज्ञानमगृहीतग्राहि न भवतीति जैनस्य प्रमालक्षणेऽव्याप्तिदोष उत्पद्यते। पुनश्चेदं रजतमित्यथार्थज्ञाने पूर्वोक्तज्ञानस्यागृहीतग्राहित्वादतिव्याप्तिदोषः प्रमालक्षणे। लक्षणं त्वव्याप्त्यतिव्याप्त्यसम्भवदोषरहितत्वेन भाव्यमिति सर्वसम्मतसिद्धान्तः। सिद्धान्तपक्षे तु प्रमाया लक्षणं यथार्थानुभवः प्रमा, *यथार्थानुभवो मानमनपेक्षतयेष्यते*, इदं यथार्थानुभवः प्रमेति लक्षणमीश्वरज्ञानेऽपि विद्यमानत्वादीश्वरः प्रमाणमितिकारणतः परमात्मनः सिद्धिर्भवति। एवं रीत्या चतुर्णां विप्रतिपत्तीनामतिसंक्षिप्तरूपेण चर्चां विधायाग्रे पूर्वोक्तं स्वसिद्धान्तमाधारीकृत्य पूर्वोक्तपञ्चतयीविप्रतिपत्तिषु तत्साधकप्रमाणाभावादिति पञ्चमविप्रतिपत्तिविषये चर्चा विधीयते –

*तत्साधकप्रमाणाभावात्* – तस्य = ईश्वरस्य, साधकप्रमाणस्य = साधकानां प्रमाणानाम्, अभावात् = विरहादिति भावः। एषा विप्रतिपत्तिर्वस्तुतो महर्षिकपिलप्रणीतम् *ईश्वराऽसिद्धेः(*१।९२) इति साङ्ख्यसूत्रं लक्ष्यीकृत्य पूर्वपक्षस्य निरीश्वरवादिसाङ्ख्यस्य मतखण्डनाय तथा च समग्रतयानीश्वरवादिजैनचार्वाकप्रभृतीनां मतखण्डनपुरस्सरमीश्वरसद्भावे प्रमाणं प्रस्तौतुञ्च श्रीमदुदयनाचार्यः स्वविरचिते न्यायकुसुमाञ्जलिग्रन्थस्य प्रथमस्वबकादारभ्य पञ्चमस्तवकं यावत् सोदाहरणमीश्वरं परमात्मानं वा साधयति। पञ्चमस्तबकस्य श्लोकोऽयं यथा –

*कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः।*
*वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः॥ (न्या.कु.५।१)*

कार्यात् – तत्रादौ ईश्वरसिद्धये प्रथमो हेतुरयम्। क्रियते यत् तत्कार्यम्। पृथिव्यां विद्यमानानि विविधकार्याणि अस्माभिरनुभूतानि प्रत्यक्षानुमानोपमानशब्दप्रमाणैः। यथा कुलालो घटं निर्माति, सूचीकारो वस्त्रं निर्माति, पाचको भोजनं निर्माति, यान्यनुभूतानि कार्याणि तानि कर्त्रा निर्मितानि। तर्करसिकानां नैयायिकानामनुमानवाक्यं यथा – क्षितिः सकर्तृका कार्यत्वात् घटवत्। अत्रानुमानवाक्ये क्षितिः = पक्षः, सकर्तृकत्वं = साध्यम्, कार्यत्वं=हेतुः, घटश्च दृष्टान्तः इत्यवधेयम्। *क्षित्यादिकं सकर्तृकं कार्यत्वात् घटवत्*(न्या.कु.२०१९:१७०) इत्यनुमानवाक्ये साध्यं सकर्तृकत्वम्, कर्तृत्वञ्च स्वोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वमिति। एवञ्च क्षितेः सकर्तृकत्वसिद्धौ स च कर्ता क इति प्रश्ने – न च तत्कर्तृत्वमस्मदादीनां सम्भवति। अत एव तत्कर्तृत्वेनेश्वरसिद्धिरित्यवधेयम्। अत्रैतदवधेयम् – यथा घटनिर्माणं

कुलालमन्तरेणाऽसम्भवन्तथैव क्षितेः, आदिशब्दादङ्कुर–बीज–विश्व–ब्रह्माण्डानाञ्च निर्माणं रचयितारमन्तरेणासम्भवम् अतः निमित्तकारणं कर्ता वा कश्चन एकः स चेश्वरः। कार्यादिति पदेनेदमवधेयम्।

आयोजनात् – ईश्वरसाधनाय द्वितीयं कारणमिदम्। आ–समन्ताद् युज्यत इति आयोजनम् = द्रव्यासाधनम् आहरणं वेत्यर्थः। *सर्गाद्यकालीनद्व्यणुकारम्भकपरमाणुद्वयसंयोगजनकं कर्म चेतनप्रयत्नपूर्वकं कर्मत्वात् अस्मदादिशरीरक्रियावत्* (न्या.कु.२०१९:१७०) इत्यनुमानम्। एवञ्च न्यायवैशेषिकराद्धान्तपक्षे द्व्यणुककार्यस्योत्पत्तौ द्वयोः परमाण्वोरावश्यकता भवति। परमाणोः स्वरूपन्तु जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः। तस्य षष्ठतमो भाग इति। तथैव त्रयाणां द्व्यणुकानां संयोगात् त्र्यणुकोत्पत्तिर्भवति। एवमनन्तरं क्रमशश्चतुर्णुकपञ्चणुकादीनामुत्पत्तिर्भवति। अदृष्टेषु परमाणुषु क्रियारहितत्वात् प्राथमिकस्पन्दनं नैव भवितुमर्हति, स्यन्दनमन्तरा परमाणुद्व्यणुकादिनिर्माणं कर्तु न शक्नोति। तस्मात् कारणतो द्वयोः परमाण्वोरचेतनत्वात् परमाणुसंयोगाय कश्चन चेतन आवश्यकः। स आयोजक एवेश्वरः। लौकिके व्यवहारे यथा – *कुत्रचित् तण्डुलाः सन्ति क्व च स्थाली क्व चेन्धनम्। तेषामायोजनं कुर्वन् मुख्यः कर्ताभिधीयते॥*(राधाकान्तदेवः,२००२,१८७) इत्यत्र पाचकः स्थालीन्धनतण्डुलादिविविधसामग्रीभिः पाचनक्रियां सम्पादयति, तथैव सृष्ट्यादौ प्रारम्भकाले वा परमाणुद्वयस्य संयोगक्रियया द्व्यणुकोत्पत्तये क्रियावान् कर्ता साधारणः पुरुषो नैव भवितुं शक्नोति। अतः स चेतनरूपी कर्तेश्वर एव इति सिद्धम्॥

धृत्यादेः – अनेन तृतीयहेतुना परमात्मा साध्यतेऽत्र। ध्रियत इति धृतिः। अत्रानुमानवाक्यम् – *ब्रह्माण्डादि पतनप्रतिबन्धकीभूतप्रयत्नवदधिष्ठितं धृतिमत्त्वात् वियति विहङ्गमधृतकाष्ठवत्*(न्या.कु.२०१९:१७०)। यथा – पक्षी नीडं स्ववासस्थानं वा निर्मातुं गगनमार्गतो गच्छन् स्वमुखे धृतं तृणं तावत्पर्यन्तं न पतति, यावत् पक्षी स्वचञ्च्वा धारयति। तत्र चेतनतत्त्वस्य प्रयत्नवशादेव पक्षिचञ्च्वा धृतं तृणं भूमौ पतने असमर्थम्। तथैव अखिलकोटिब्रह्माण्डा अपतित्वा यथास्थानमेव स्थिताः सन्ति। फलतस्तेषां समूलब्रह्माण्डानां धारयिता, सुनियन्त्रकः, सुव्यस्थापकश्च कश्चनावश्यमेव भवितव्यः, यस्य प्रयत्नवशात् धारणादिक्रियाः सम्पद्यन्ते, स चेतनो परमात्मेश्वरो वर्तते।

धृत्यादेरित्यत्र प्रसङ्गत आदिशब्दस्य नाश इत्यर्थोऽवधेयः। *ब्रह्माण्डादि प्रयत्नवद्विनाश्यं विनाशित्वात् पाट्यमानपटवत्*(न्या.कु.२०१९:१७१) यथा घटवस्त्रादिनाशार्थं चेतनतत्त्वस्यानिवार्यता भवति, चेतनतत्त्वमन्तरा घटवस्त्राद्यचेतनपदार्थानां नाशोऽसम्भवस्तथैव प्रलयावस्थायां ब्रह्माण्डानां नाशोऽवश्यम्भावी शास्त्रवचनत्वात्। नाशश्च कश्चन चेतनपदार्थद्वारैव सम्भवति। स च चेतनपदार्थ ईश्वर इत्यवबोद्धव्य इत्याचार्योदयनो धृत्यादेरिति सप्रमाणकहेतुनेश्वरं प्रमाणीकरोति।

पदात् – चतुर्थं कारणमीश्वरसाधनायेदम्। तत्र पदादिति शब्दोऽर्थत्रयमुपस्थापयति। तत्र प्रथमोऽर्थः श्रुतौ वेदेषु वा प्रयुक्तानि पदानि यथा – *सम्बाहुभ्यां धमति सम्पपत्रैर्द्यावाभूमी जनयन्देव एकः*(शु.य.१७।१९), *ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्*(शु.य.४०।०१), *यः सर्वज्ञः स सर्ववित्*(मु.उ.१।१।१०), *सत्यं ज्ञानमनन्तं ब्रह्म*(तै.उ.२१), *अन्तः*

*प्रविष्टः शास्ता जनानाम्*(तैत्तिरीयारण्यकम्,३।१११।१०), *खम्ब्रह्म*(शु.य.४०।१७) इत्यादीनि बहुसंख्याकानि। पूर्वोच्चारितपदेषु प्रयुक्तैः ईशदेवब्रह्मगोप्तृकर्तृसर्वज्ञशब्दैरीश्वरपदवाच्यः स एव ग्राह्यः।

पदशब्दस्य द्वितीयोऽर्थः शब्दव्यवहारो वाग्व्यवहारो वा। यथानुमानम् – *पटादिसम्प्रदायव्यवहारः स्वतन्त्रपुरुषप्रयोज्यो व्यवहारत्वात् आधुनिकलिप्यादिव्यवहारवत्* (न्या.कु.२०१९:१७१)। ब्रह्माण्डे विद्यमानानि यावन्ति वस्तूनि विद्यन्ते, तेषां समेषां काचन संज्ञाऽवश्यमेव वर्तते तस्याः संज्ञायाः शब्दव्यवहारेण वाचा सांकेतिकभाषया वा व्यवहारो दृश्यते लोके। परन्तु साधारणो जनः सर्वमपि वस्तु ज्ञातुं नैव प्रभवति असर्वज्ञत्वाल्लोके च तथादृष्टत्वात्। *यः सर्वज्ञ, स सर्वविद्*(मु.उ.१।१।१०) इति श्रुतिवचनादीश्वर एव ग्राह्यो भवति। यतोहीश्वर एव तादृशः सर्वज्ञो वर्तते यः सर्वमपि ज्ञातुं प्रभवति। तर्कसंग्रहकारोऽन्नम्भट्टोऽपि श्रुतिमर्यादामङ्गीकृत्य *तत्रेश्वरः सर्वज्ञः परमात्मा एक एव*(तर्कसंग्रहः,२००७:७०) इत्युल्लिखति। सृष्ट्यादौ विविधसंज्ञावतां वस्तूनां ज्ञानं केवलं परमात्मनि सर्वज्ञे विद्यमानत्वात् तत्परम्परया सामान्यमानवैः प्राणिभिरपि तज्ज्ञानं स्वीकृतत्वादस्माकं पदव्यवहारार्थं सर्वज्ञः पुरुष एव चेतव्यो नान्यः कश्चिदिति आचार्यस्य भावो विद्यते।

पदशब्दस्य चरमोऽर्थस्तु ज्ञानम्। ज्ञानन्तु नृत्य–सङ्गीत–गायन–गृहनिर्माण–यन्त्रनिर्माण–शिक्षणकला–कलाकौशलादिबहुप्रकारकं भवति। लोकव्यवहारे परलोकव्यवहारे च दृष्टमनुभूतं प्रयुक्तञ्च विविधप्रकारकं ज्ञानं गुरुमन्तराऽसम्भवमेव। अतो गुरुरनुमातव्य एव। तादृशो जगद्गुरुरीश्वर एव भवितुमर्हति यः किल सर्वज्ञश्च वर्तते। अतो ज्ञानस्याधारः परमात्मा विश्वविदिति श्रीमदुदयनस्य मनीषा।

प्रत्ययतः – कारणमिदं पञ्चमं परमात्मसाधनाय। यथानुमानम् – *वेदजन्यं ज्ञानं कारणगुणजन्यं प्रमात्वात् प्रत्यक्षादिप्रमावत्*(न्या.कु.२०१९:१७१)। तत्र श्रुतौ सर्वाश्च ऋचः प्रमात्मिका वर्तन्ते। वेदस्य प्रामाण्यमन्यथानुपपत्त्येश्वरसिद्धिर्भवति। यथास्माभिः प्रत्यक्षानुमित्युपमितिशाब्दज्ञानं क्रियते, तच्च ज्ञानं करणजन्यं भवति। प्रत्यक्षानुमित्यादिज्ञानाय न्यायदर्शने स्वतः प्रामाण्यवादः, परतः प्रामाण्यवादश्चावलम्बितौ वर्तेते। यथा – *पीतः शङ्ख* इत्यत्र पित्तदोषवशादिन्द्रियकरणजन्यज्ञानमयथार्थं भवति चेत् कालान्तरे पित्तदोषरहितावस्थायां *श्वेतः शङ्खो न तु पीत* इतीन्द्रियजन्यं यथार्थज्ञानं भवति। तद्वदेव वेदजन्यं यत्प्रामाण्यं तदपि वक्तृजन्यगुणमाध्यमेन भवति। अस्मात् कारणाद् वेदस्य वक्ता सर्वज्ञत्वादिविशिष्टेश्वरः सिद्ध्यति।

श्रुतेः – श्रूयतेऽनयेति श्रुतिः = वेदः। ईश्वरं प्रमाणीकर्तुं षष्ठं कारणमिदम्। अनुमानं यथा – *वेदः पौरुषेयो वेदत्वात् आयुर्वेदवत्*(न्या.कु.२०१९:१७१)। श्रुतिरित्यस्य तात्पर्यन्तु वेदोपनिषद्ब्राह्मणारण्यकसंहिता ग्राह्याः। एताः खल्वीश्वरेण प्रतिपादिताः। ईश्वरसाधनाय चैतानि श्रुतिवचनानि। यथा – *ईशावास्यमिदं सर्वम्(शु.य.४०।०१), भोक्ता भोग्यं प्रेरितारञ्च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्(श्वे.उ.०१।१२), अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा(तै.आ.३।११), आत्मैवेदम्, नेह नानास्ति किञ्चन, सर्वं खल्विदं ब्रह्म(छा.उ.३।१४।०१), आत्मा वेदेमेक एवाग्र आसीत्(ऐ.उ.१।१)*

इत्यादयो नैके मन्त्रा ईश्वरं परमात्मानं वा प्रतिपादयन्ति। सृष्टेः पूर्वमीश्वर एव आदिपुरुषः, यस्येश्वरस्य सत्तां वेदाः प्रतिपादयन्ति इतिकारणतः परमात्मा साध्यत इत्याचार्यस्य सम्मतिः।

वाक्यात् – सप्तमो हेतुः वाक्यम्। उच्यत इति वाक्यम्। तिङ्सुबन्तचयो वाक्यमिति व्यवहारः। *वेदः पौरुषेयो वाक्यत्वात् भारतादिवत्, वेदवाक्यानि पौरुषेयाणि वाक्यत्वात् अस्मदादिवाक्यवत्*(न्या.कु.२०१९:१७२) इत्यनुमानवाक्यम्। अनेनानुमानवाक्येन वेदस्यापौरुषेयत्वं सिद्ध्यति। कथमिति चेदत्र उदाहरणतया ज्ञायते। अत्र वाक्यमिति कथनेन वैदिकी प्रशंसा निन्दार्थकोऽर्थो ग्राह्यः। यथा प्रशंसार्थकेऽर्थे पक्वाम्रफलं मधुरं भवति इति वाक्यस्य प्रयोगो भवति। अत्र उपर्युक्तवाक्यस्य सूक्ष्माध्ययनेन प्रशंसानिन्दोभयार्थकोऽर्थो ग्रहणीयः। पक्वाम्रफलं मधुरं भवतीत्यस्य तात्पर्यं अपक्वाम्रफलं निन्दनीयं हेयमखाद्यं वा भवतीत्यर्थो निर्गलितः। यः कोऽपि पुरुषो यं कमपि विषयं निश्चित्य तस्मिन् विषये वाक्यप्रयोगद्वारा प्रशंसां निन्दां वा करोति चेद् सः खलु तस्मिन् विषये पूर्णतया ज्ञानी भवति। यतोहि विषयज्ञानमन्तराऽऽद्योपान्तं कथं जानीयात्, सति चाज्ञाने कथं स्तुतिं निन्द्याञ्च कर्तुं प्रभवेत् ? तद्वदेव वैदिकमन्त्राणां सूक्तीनामपि प्रयोगकर्ता वक्ता अवश्यमेवास्ति। एतादृशः सर्वज्ञ ईश्वरेतरपुरुषो नैव सम्भवति। अतो वाक्यादपीश्वर एवाङ्गीकर्तव्य इति उदयनाचार्यस्य मतिः।

संख्याविशेषात् – परमात्मसाधनाय चरमो हेतुः संख्याविशेषाख्यो हेतुः श्रीमदुदयनाचार्यः प्रस्तौति। अत्रानुमानवाक्यं यथा – द्व्यणुकपरिमाणं संख्याजन्यं परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वात् तुल्यपरिमाणककपालद्वयारब्धघटपरिमाणात् प्रकृष्टतादृशकपालत्रयारब्धघटपरिमाणवत्(न्या.कु.२०१९:१७२)। सृष्ट्यादौ परमाणुद्वयसंयोगाद् द्व्यणुकोत्पत्तिः, द्व्यणुकस्याणुपरिमाणं न परिमाणप्रचयजन्यमपितु संख्याजन्यम्। परमाण्वोर्विद्यमानस्य द्वित्वसंख्याया अनित्यत्वादपेक्षाबुद्धिरपरिहार्या। अपेक्षाबुद्धिश्च कस्मिँश्चन चेतन एव भवति। स च अस्मदादिविशिष्टः कश्चन वर्तते। स एवेश्वर इति संख्याविशेषादित्यस्य तात्पर्यम्। अपि च सृष्ट्यादौ भगवतेश्वरेण *तदैक्षत एकोऽहं बहु स्यां प्रजायेय* इत्युत्तमपुरुषवाक्ये प्रयुक्तयोः स्याम्, ऐक्षत इत्यनयोः क्रिययोरेकत्वसंख्यां बोधयति। अत एकत्वसंख्याया आधारः प्रवक्ता ईश्वर एवेति प्रमाणं पूर्वोक्तश्रुतिवाक्येन स्पष्टीभवति। तथैव *एकं सद्विप्रा बहुधा वदन्तीति* लोकव्यवहारे शास्त्रेषु च तथा व्यवह्रियते।

संख्याया अपरोऽर्थः सम्यक् ख्यायते = कथ्यते अनयेति संख्या इति व्युत्पत्त्या संज्ञेत्यर्थो लभ्यते। एतद्व्युत्पत्त्यनुसारं संज्ञार्थकं ग्रहणेन चतुर्वेदानां शाखोपशाखानां यथा ऋग्वेदस्य शाकल–वाष्कल–आश्वलायन–शांखायनप्रभृतय एकविंशतिशाखास्तथैव शुक्लयजुर्वेदस्य वाजसनेयि–काण्वशाखाः, कृष्णयजुर्वेदस्य पञ्चाशीतिशाखासु सम्प्रति प्राप्ताः कठ–तैत्तिरीय–मैत्रायणी ठक–कालापकप्रभृतयः, सामवेदस्य सहस्राधिकशाखासु सम्प्रत्युपलब्धाः कौथुमी–जैमिनि–राणायनीशाखाः, अथर्ववेदस्य च पिप्पलाद–शौनक–देवदर्शादिनव शाखाः, एवमनुपलब्धा अनेकाः शाखाः सन्ति। तत्तच्छाखानां नामानि भगवता परमात्मनैव प्रदत्तानि। यतोहि अनादिकालत

एताः शाखाः प्रवर्तिता अध्येतृवर्गैश्चाधीताः सन्ति। तच्छाखानां नामानि सामान्यजनैर्दातुं न शक्यन्त इतिकारणतो भगवदीश्वर एव कारणम्। भगवतैव प्रवचनबलात् प्रदत्तानीति भाव आचार्योदयनस्य।

अनया दिशा अष्टविधहेतुभिरीश्वरसिद्धिर्विविधतर्कबलात् प्रत्यक्षानुमानोपमानशब्दप्रमाणैः कृता। तत्र न्यायदर्शनमीश्वरं जगदधिष्ठातृत्वेन, नित्यज्ञानवत्वेन, सर्वज्ञत्वेन, सृष्टिपालनसंहारकर्तृत्वेन च व्यवहरति। आत्मपदार्थो जीवात्मपरमात्मभेदेन द्विविधश्चेति साधयति।

## निष्कर्षः

संस्कृतवाङ्मये महर्षिगौतमप्रणीतन्यायदर्शनस्य विशिष्टं स्थानं वर्तते। विदितमेवेदं यत् न्यायशास्त्रं सर्वेषामुपकारकं वर्तते। न्यायशास्त्रस्यापरं नाम तर्कशास्त्रमपि। तर्केश्च यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः इतिवचनाच्च शास्त्रमिदं धर्मशास्त्रमित्यपि वक्तुं शक्यते। किं बहुना ! न्यायसूत्रत एव समुद्भूता आत्मतत्त्वविवेक–न्यायकुसुमाञ्जलिप्रभृतयो ग्रन्थाः भौतिकक्षेत्रे नैरात्म्यवादिबौद्धचार्वाकादिनास्तिकदर्शनानां खण्डने स्वमतस्थापने चाग्रसरो न्यायकुसुमाञ्जलिग्रन्थस्य रचयिताऽऽचार्योदयनः स्वग्रन्थेषु प्राय ईश्वरसाधनायैव प्रयतते। आत्मतत्त्वविवेकग्रन्थे आत्मनोऽनित्यत्वसिद्धये बौद्धैः प्रस्तुतान् नानाविधतर्कान् स्वकीयतर्कयुक्तिभिः निरस्यात्मनो नित्यत्वं प्रतिपादितवानसौ उदयनाचार्यः। अपरस्मिन्न्यायकुसुमाञ्जलिग्रन्थेऽपि बौद्धजैनसाङ्ख्यचार्वाकमीमासादर्शनैः प्रस्तुतानां पञ्चविप्रतिपत्तीनामासमन्तात् विविधतर्कबलेन निराकृत्य प्राबल्येनेश्वरोऽव्ययो विश्वविद् साधितः। आकारदृष्ट्या लघुग्रन्थे दृष्टे सत्यपि क्रियाबलात् गरीयानेष ग्रन्थ इति दार्शनिका उद्घोषयन्ति। अतः आदावेव विशिष्टग्रन्थत्वेनायं गृह्यते। वस्तुत आस्तिकेषु साङ्ख्याः मीमांसकाश्चेश्वरं नाङ्गीकुर्वन्ति चेन्नास्तिकानां का कथा ?। अतोऽनीश्वरवादिजैनचार्वाकबौद्धसाङ्ख्यमीमासकानां मतखण्डनाय स्वसिद्धान्तस्थापनाय च प्रवृत्तोऽयमाचार्यो भक्तशिरोमणिरीश्वरसाधकत्वेन जगति प्रसिद्धोऽस्ति। न्यायकुसुमाञ्जलिकर्त्रा नित्यज्ञानवानीश्वर एव विश्वविदव्ययपरमात्मादिनामभिः शास्त्रेषु निर्दिष्टमस्ति। अत्रेश्वरचिन्तनक्रमे आचार्योदयनस्य जीवनवृत्तविषयोऽप्युत्थाप्येश्वरसम्बन्धिनी चर्चा कृताऽस्ति। आलेखस्यास्योद्देश्यं तु उदयनाचार्यप्रणीतन्यायकुसुमाञ्जलिग्रन्थस्थपञ्चतयीविप्रतिपत्तीनां खण्डनं विधायेश्वरसाधनमेव मुख्यं प्रयोजनमस्तीति निष्कर्षः स्थापितः।

## कृतज्ञताज्ञापनम्

लेखस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च परीक्षणं विधाय सम्पादनाय परिष्काराय च हार्दमुपकारं कृतवद्भ्यः सर्वेभ्यो विशेषज्ञगुरुभ्यः, अन्येभ्यः सहयोगिभ्यश्च हार्दं कार्तज्ञ्यं व्यनज्मि।

## सन्दर्भग्रन्थसूची


अन्नंभट्टः, (२००७ ई.), *तर्कसंग्रहः*, आलोकव्याख्यासहितः,(द्वि.सं.), के.एस.वरदाचार्यः(व्या.), मैसुरु, (आर्षग्रन्थप्रकाशनम्।

आचार्यः, उदयनः (२०१९ वि.सं.), *न्यायकुसुमाञ्जलिः*, हरिदासीव्याख्या एवं विश्वेश्वरकृतहिन्दी व्याख्यासहिता, वाराणसी : चौखम्बा विद्याभवन, ।

गौडः, शशिबाला (२०१७ ई.), *दर्शनशास्त्रस्येतिहासः*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।

पाणिनिः, (१९९३ ई.) *अष्टाध्यायी*, शिवप्रसाद द्विवेदी(सं.), भारतीय विद्याप्रकाशन, वाराणसी।

महर्षिः, श्रीकपिलः (१९३६ ई.), *साङ्ख्यदर्शनम्* (विज्ञानभिक्षुविरचितप्रवचनभाष्यसहितम्), आम्हार्ष्टष्ट्रीट् पोष्ट अफिस, कलिकाता।

माधवाचार्यः (१९७८ ई.), *सर्वदर्शनसंग्रहः*, डा. उमाशंकरशर्मविरचित भाष्यसमेत, चौखम्बा विद्याभवन, वाराणसी।

राधाकान्तदेवः, राजा (२००२ ई.), *शब्दकल्पद्रुमः*, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली।

वेदव्यासः, महर्षिः (२०७८ वि.सं.), *श्रीमद्भगवद्गीता*, गोरखपुर, गीताप्रेस।

शर्मा, वासुदेवः (२००३ ई.), *ईशाद्यष्टोत्तरशतोपनिषदः*, दिल्ली, (राष्ट्रियसंस्कृतसंस्थानम्।

*शुक्लयजुर्वेदमाध्यन्दिनीयसंहिता* (२०७३ वि.सं.) चौखम्बा संस्कृत पुस्तकालय, वाराणसी।

सिंह, उदयनारायण (२००४ ई.), *न्यायदर्शन* (पुनर्मुद्रितसँस्करण) दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान।